॥अथपाञ्जमानतंत्रप्रारंभः॥

श्रीगणेशायनमः॥अथयाजमानमंत्रः॥अग्निं
गृंह्णामिसुरथंयोमयोभूर्यउद्यंतमारोहंतिसू
र्युमह्ने॥आदित्यंज्योतिषांज्योतिरुत्तमंश्वोय
ज्ञायेरमृतांदेवताभ्यः॥वसून्रुद्रानादित्यानिं
द्रेणसहदेवताः॥ताःपूर्वाःपरिगृंह्णामिस्वआय
तनेमनीषया॥इमामूर्जंपंचदशींयेप्रविष्टास्तां
देवान्परिगृह्णामिपूर्वः॥अग्निर्हव्यवाडिहता
नावहतुपौर्णमासंहविरिदमेषांमयि॥इति

या॰ मा॰ यो गेम स्यां॥ अमावास्ये हविरिदं मे षां मयि॥
१ आमावास्यायामन्वाधीयमाने जपति॥ अंतरा
ग्नी पृश्नयो देवसंसदमागमन्॥ तान्पूर्वः परिगृ
ह्णामि स्व आयतने मनीषया॥ अंतराग्नीति हं जप
ति॥ इह प्रजा विश्वरूपा रमंतामग्निं गृहपतिम
भिसंवसानाः॥ ताः पूर्वः परिगृह्णामि स्व आयतने
मनीषया॥ इह पशवो रमंतामग्निं गृहपतिमभिसं १
वसानाः॥ तान्पूर्वः परिगृह्णामि स्व आयतने—

विश्वरूपा

मनीषया॥गार्हपत्येन्वाधीयमानेजपति॥अयंपि
तृणामग्निरवाड्ढव्यापितृभ्यआ॥तंपूर्वःपरिगृ
ह्णाम्यविषंनःपितुंकरत्॥दक्षिणाग्नावन्वाधी
यमानेजपति॥यजमानः॥इदमहमग्निज्येष्ठे
भ्योवसुभ्योयज्ञंप्रब्रवीमीदमहमिंद्रज्येष्ठेभ्योरु
द्रेभ्योयज्ञंप्रब्रवीमीदमहंवरुणज्येष्ठेभ्यआदि
त्येभ्योयज्ञंप्रब्रवीमि॥अन्वाहितेयुजपति॥वि
द्युदसिविद्यमेपाप्मानमृतंःसत्यमुपैमिमयि

पा·मा· अस्या॥ अप उपस्पृश्य॥ अपरेणाहवनीयं दक्षिणा
२ तिक्रम्य॥ पर्यस्वतीरोषधयः पर्यस्वद्वीरुधां पयः॥
अपां पयसो यत्पयस्तेन मामिंद्र संसृज॥ अप आ
चमति॥ देवा दिवेषु पराक्रमध्वं प्रथमा द्वितीयेषु
द्वितीयास्तृतीयेषु त्रिरेकादशा इह मावत॥ इदं
शकेयं यदिदं करोम्यात्मा करोत्वात्मनेइदं करिष्ये
भेषजमिदं मे विश्वभेषजाश्विनाप्रावतं युवं॥ देव
ता उपतिष्ठते॥ समुद्रं मनसा ध्यायन्॥ सम्राड २

स्मिन्व्रतपाअसिव्रतानांव्रतपतिरसिव्रतमारभेतत्तेप्रब्रवीमितच्छकेयंतेनशकेयंतेनराध्यासं॥आदित्यमुपतिष्ठते॥अग्नेव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां॥अग्निं॥वायोव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां॥वायुं॥आदित्यव्रतपते॰तां॥आदित्यं॥व्रतानांव्रतपते॰तां॥व्रतपतिं॥पर्वणियजमानस्स्वयमग्निहोत्रंजुहोति॥यवाग्वामावास्यायांसन्नमयंस्तस्याउच्छेष

सा॰मा॰ ण्मातं च नार्थं निदधाति ॥ उभावग्नी उपस्तृणते
२ देवता उपवसंतु मे ॥ अहं ग्राम्यानुपवसामि म
ह्यं गोपतये पशून् ॥ सायं परिस्तीर्यमाणेषु जप
ति ॥ भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं
त्वा वृणीमहे ॥ ब्रह्माणं वृणीते ॥ अपरेणाहवनी
यं दक्षिणातिक्रम्य ॥ तूष्णीं निरसनादि कृत्वा स्व
आयतन उपविशति ॥ भूश्च कश्च वाक् च गौश्च वट् च
खं च धूश्च नूश्च पूश्चैकाक्षराः पूर्वज्ञा मा विराजोस्मा ३

इदं विश्वं भुवनं व्यानशुस्ता नो देवीस्तरसा संविदा-
नास्वस्ति यज्ञं नयत प्रजानती ॥ प्रणीताः प्रणीय
माना अनुमंत्रयते ॥ ब्रह्म पूतास्थ को वो युनक्ति स
वो युनक्तु विश्वेभ्यः कामेभ्यो देवयज्यायै ॥ साद्य
मानाः ॥ कस्त्वा युनक्ति सत्वा युनक्तु ॥ यज्ञं युनक्तु ॥
सर्वं विहारमनुवीक्षते ॥ यजमानहविर्निर्वप्स्या
मी स्रुच्यमाने ॥ ओं निर्वप ॥ अग्निं होतारमिह
तं हुवे देवान्यज्ञियानिह यान्हवामहे ॥ आयं

वा॰मा॰ तुदेवाः सुमनस्यमाना वियंतु देवा हविषो मे अस्य॥
४ हविर्निरूप्यमाणमनुमंत्रयते॥ रक्षोभ्य इदं०॥ अप
उ० एकतायेदं० द्वितायेदं० त्रितायेदं० इदं तस्मै ह
र्म्यं करोमि यो वो देवाश्चरति ब्रह्मचर्यं॥ मेधावी दि
क्षु मनसा तपस्व्यंतर्दूतश्चरति मानुषीषु॥ विदि
देशमभिमृशति॥ चतुःशिखंडा युवतिः सुपेशा
घृतप्रतीका भुवनस्य मध्ये॥ मर्मृज्यमाना मह
ते सौभगाय मह्यं धुक्ष्व यजमानाय कामान्॥ वे ४

देनवेदिं बृहतीमविंदन्त्सा पृथिव्यां प्रथतां पा
र्थिवानि॥ तस्यां बर्हिः प्रथतां साध्वंतरहिंस्रा
णः पृथिवी देव्यस्तु॥ येदेनवेदिं विविदुः पृथिवीं
सा पप्रथे पृथिवी पार्थिवानि॥ गर्भं बिभर्ति भुवने
ष्वंतस्ततो यज्ञो जायते विश्वदानिः॥ वेदिं संमृज्य
मानामनुमंत्रयते॥ यो मा हृदा मनसा यश्च वाचा
यो ब्रह्मणा कर्मणा द्वेष्टि देवाः॥ यः श्रुतेन हृदये
नेष्णता च तस्येंद्र वज्रेण शिरश्छिनद्मि॥ स्तंबय

या॰मा॰ जुर्ह्रियमाणमनुमंत्रयते॥ बृहस्पतेपरिगृहाणवेदिं॑

५ स्वगावोदेवाःसदनानिसंतु॥ तस्यांबर्हिःप्रथतां॑सा

ध्वंतरर्हिं॑स्वाणःपृथिवीदेव्यस्तु॥ पूर्वपरिग्राहेज

पति॥ यद्वृधंतोजिहिं॑सिमपृथिवीमोषधीरपः॥ अ

ध्वर्यवस्यकृतस्येनोंतरिक्षंमोरूपावतुस्मात्॥ य

द्वृधंतोजिहिं॑सिमजीवमस्यावेदिंचकृमामनसादे

वयंतः॥ मातेनहेडउपगामभूम्याःशिवानोविश्वेर्भुव

नेभिरस्तु॥ स्यैनोत्तमांत्वचमुधन्यमानां॥ बृहस्प ५

तेपरि॰स्तु॥ भूमिर्भूत्वामहिमानंपुपोषततोदेवीवं

र्धयते पयांऽसि॥ युक्ष्मियो पुञ्ज्वं विच्युयंति त्रंचो
षधीरापहूहश्राद्भरीभ्य॥ कृतानुमंत्रयते॥ ईडे
न्यक्रतूरहमपोदेवीरुपब्रुवे दिवानक्तंचसस्तु
षीरपस्वरीः॥ प्रोक्षणीरासाद्यमाना अनुमं
त्रयते॥ प्रजापतयइदं॰ आज्यमसि सत्य
मसि सत्यस्या ध्यक्षमसि हविरसि वैश्वानरं
वैश्वदेवमुत्पूतशुष्मं सत्योजाः सहोसि स

या·मा·
६

हं मानमसि सहस्वारातीः सहस्वारातीयतः
सहस्व पृतनाः सहस्व पृतन्यतः॥ सहस्रवी
र्यमसि तन्मा जिन्वाज्यस्याज्यमसि सत्यस्य
सत्यमसि सत्यायुरसि सत्यशुष्ममसि स
त्येनत्वाभिघारयामि तस्यते भक्षीय॥ नि
मीरन्यानुच्छुसंनवेक्षते॥ अङ्गिराज्यमाज्ये
नापः सम्यक्पुनीत सवितुः पवित्रैः॥ तादे ६

वाः शाक्करीः शाक्करेणेमं यज्ञमवतसंवि
दानाः॥ आज्यमपश्चोस्तूयमानाः॥ पं
चानां त्वा वातानां यंत्राय धर्त्राय गृह्णामि पं
चानां त्वा चतुः कृत्वोभि मंत्रयते॥ पंचानां त्व
र्तूनां यंत्राय धर्त्राय गृ० पंचानां त्वा दिशां यं
त्राय धृ० पंचानां त्वा पंचजनानां यंत्राय ध०

या०मा० चरोस्त्वा पंचबिलस्य० ब्रह्मणस्त्वा तेजसेयंत्राय०
क्षत्रस्य त्वौजसे यंत्राय० विशे त्वा यंत्राय० सुवी
र्याय त्वा गृ० अष्टाव स्मिस्त्र मुपभृति यजमानो
ध्येतैरेवानुमंत्रयते॥ सुप्रजास्त्वायत्वा० राय
स्पोषाय त्वा गृ० ब्रह्मवर्चसाय त्वा गृ०॥ भूर
स्माकं हविर्देवानामाशिषो यजमा
नस्य देवानां त्वा गृह्णामि॥ भूयि

देवतास्य

ष्ठं ध्रुवायां यजमानो व्येतैरेवानुमंत्रयते॥ अश्चिश्रे
मबर्हिरंतः पृथिव्यारुंसंरुंरोहयंत ओषधीर्विरूक्णाः॥
यासां मूलमुदवधीस्फ्येन शिवानस्ताः सुहवाभ
वंतु॥ बर्हिरासाद्यमानं॥ सुमनसो यजमानाय
संत्वोषधीराप इह शक्करीश्च॥ वृष्टिद्यावापर्जन्य
एनाविरोहयतु हिरण्यवर्णाः शतवल्शा अदब्धाः॥
बर्हिः प्रोक्ष्यमाणमनुमंत्रयते॥ पितृभ्यो बर्हिषज्ञ्य
इदं० ऊर्णाम्रदुप्रथमानरुंस्योनंदेवेभ्यो जुष्टरुंस

या·मा· दनाय बर्हिः॥ सुवर्गे लोके यजमानꣳ धेहि मां नाक
८ स्य पृष्ठे परमे व्योमन्॥ बर्हिस्तीर्यमाणं॥ चतुःशिखं
डा युवतिः सुपेशा घृतप्रतीका भुवनानि वस्ते॥ सा
स्तीर्यमाणा महते सौभगाय सा मे धुक्ष्व यजमाना
य कामान्॥ मध्यमधातुना वेदिꣳ स्तीर्यमाणां॥ शि
वा च मे शग्मा चैधि स्योना च मे सुषदा चोर्जस्वती
च मे पयस्वती चैधीषमूर्जं मे पिन्वस्व ब्रह्मतेजो मे ८
पिन्वस्व क्षत्रमोजो मे पिन्वस्व विशं पुष्टिं मे पिन्वस्वा

पुरुन्नाधं मे प्रजां पुभूम्नै पिन्वस्व ॥ स्तीर्णा ॥ अस्मि
न्यज्ञ उपभूय इन्नु मे विक्षोभाय परिधीन्दधामि ॥ ध
र्त्ता धरुणो धरीयानग्निर्द्वेषांसि निरितोनुदाते ॥
ध्रुवोसि ध्रुवोहं सजातेषु भूयासं धीरश्चेत्तावसु
वित् ॥ परिधीन्परिधीयमानाननुमंत्रयते ॥ अ
स्मिन्यज्ञ० उग्रोस्युग्रोहं सजातेषु भूयासमुग्र
श्चेत्तावसुवित् ॥ दक्षिणां ॥ युनज्मि त्वा ब्रह्मणा
दैव्येन हव्यायास्मै वोढवे जातवेदः ॥ इंधानास्त्वा

या॰मा॰ सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥
२ यन्मे अग्ने अस्य यज्ञस्य रिष्याद्यद्वा स्कंदादाज्य
स्योत विष्णो ॥ तेन हन्मि सपत्नं दुर्मरायुमेनं दधा
मि निर्ऋत्या उपस्थे ॥ अग्निं परिधीयमानं ॥ अ
स्मिन्यज्ञः अभिभूरस्यभिभूरहं सजातेषु भू
यासमभिभूश्चेत्ता वसुवित् ॥ ते जिह्वा ते तपना या च
रोचना मर्त्योषंतीस्तन्वो यास्ते अग्ने ॥ ताभिर्वर्माण्य २
भितो व्ययस्व मा त्वा दभन्यातुधानाः पिशाचाः ॥ प

रिधितं॥ विछिनद्मि विधृती भ्यां सपत्नाजा तान्भ्रातृव्यान्येचजनिष्यमाणाः॥ विज्ञोयंत्राभ्यां विधमाम्येनानहंस्वानामुत्तमोसानिदेवाः॥ विज्ञोयंत्रेनुदमांनु अरातिं विश्वंपाप्मानुमंस्तितिंदुर्मरायुं॥ सीदंतीदेवीसुकृतस्य लोके धृतीस्थो विधृती स्वधृती प्राणान्मयिधारयतं प्रजांमयिधारयतं पशून्मयिधारयतं॥ विधृतीसाद्यमाने॥ अयंमेस्तुरउभयस्य धर्ता धर्ता प्रयाजानामुतानूयाजानां॥ सर्वा धारसमिधो विश्वरूपास्तस्मिन्स्रुचोअध्या

या॰मा॰ सादयामि॥ प्रस्तरं॥ आरोहपथो जुहू देवयानान्यत्र
१० र्षयः प्रथमजा ये पुराणाः॥ हिरण्यपक्षाजिरा संभृ
तांगा वहासि मा सुकृतां यत्र लोकाः॥ जुहूरसि घृता
चीगायत्रियाग्नीक विभिर्जुषाणा॥ अव्यथमाना
यज्ञं मनुयच्छ स्वसुनीती यज्ञं नयास्युप देवानाग्ने
येन शर्मणा दैव्येन॥ जुहूम्॥ अवाहं बाधउपभृ
तासपत्नान्जातान्भ्रातृव्यान्ये च जनिष्यमाणाः॥ १०
दोहै यज्ञं सुदुघामिव धेनुमहमुत्तरो भूयासम

धरे मत्स पत्नीः॥ सुभृदस्युप भृद्धृताचीत्रैष्टुभेन छंदसा विश्वेवेदः॥ अव्यथमानायज्ञमनुयच्छस्व सुनीतीयज्ञंनयास्युपदेवानैंद्रेण शर्मणा दैव्येन॥ उपभृतं॥ यो मा वाचा मनसा दुर्मरायुर्हृदा सती यादंभिदासदग्ने॥ इदमस्यचित्तमधरंध्रुवाया अहमुत्तरोभूयासमधरे मत्स पत्नीः॥ ध्रुवासि धरणीधनस्य पूर्णाजागतेन छंदसा विश्वेवेदः॥ अव्यथमानायज्ञमनुयच्छस्व सुनीतीयज्ञंनया

पा·मा· स्युपदेवान्वैश्वदेवेनशर्मणादैव्येन॥ ध्रुवां॥ स्योनो
११ मेसीदसुषदःपृथिव्यांप्रथयपिप्रजयापशुभिःसुव
र्गेलोके॥ दिविसीदपृथिव्यामंतरिक्षेहमुत्तराभू
यासमधरेमत्सपत्नाः॥ अयंस्रुवोअभिजिहर्ति
होमान्छतक्षरेश्छंदसानुष्टुभेन॥ सर्वायज्ञस्यसे
मनक्तु। विश्वाबार्हस्पत्येनशर्मणादैव्येन॥ स्रुवं॥
इयंस्थालीघृतस्यपूर्णाछिन्नपयाःशतधार ११
उत्सः॥ मारुतेनशर्मणादैव्येन॥ आज्यस्थाली॥

प्रियेण नाम्ना प्रियꣳ सद आसीदंतु॥ यज्ञोसि सर्व
तः श्रितः सर्वतो मां भूतं भविष्यच्छ्रयताꣳ शतं मे
संत्वाशिषः सहस्रं मे संतु सूनृता इरावतीः पशुप
तीः॥ आग्नेयमासं नोभिमंत्रयते॥ प्रजापति
रसि सर्वतः श्रितः सर्वतो मां भूतं भविष्यच्छ्रयताꣳ
शतं मे संत्वाशिषः सहस्रं मे संतु सूनृता इराव
तीः पशुपतीः॥ अग्नीषोमीयं॥ योनः कनीयꣳ
मह्यं॥ अपतमिंद्रो वेम धो भुवनानुदेतामहं प्र

या॰मा॰ जां॰ देय॥ इन्द्र वैमृधं॥ योनः कनीय इह कामयाता॰
१२ मह्यं॥ अपतमिन्द्राग्नी भुवनां॰ विदेय॥ ऐन्द्राग्नं॥
अयं यज्ञः समसदद्धविष्मान् ऋचा साम्ना यजुषा
देवताभिः॥ तेन लोकान्सूर्यवतो जयेमेन्द्रस्य सख्य
मेमृतत्वमश्यां॥ सः संनान्यभिमृशानि॥ ममा
ग्ने वर्चो विहवेष्वस्तु॰ मानोरीरिषो मा परादाः॥
पृथिवी होता॥ द्यौरध्वर्युः॥ रुद्रोग्नीत्॥ बृहस्प १२
तिरुपवक्ता॥ अग्निर्होर्व्वत्र॥ पौर्णमास्याः हवीः

ष्यासन्यान्यभिमृन्नाति॥अग्निर्होता॥अश्विनाः
ध्वर्यू॥त्वष्टाग्नीत्॥मित्र उपवक्ता॥पंचहोत्रेवा
मास्यायां॥चित्तिः स्रुः॰ सामाध्वर्युः॥अंगिरसो
मास्यं यज्ञस्य प्रातरनुवाकैरवंतु॥अनूच्यमा
नासुसामिधेनीषु जपति॥ समिध्यो अग्निरा
ऊतः स्वाहाकृतः पिपर्तु नः॥ स्वगा देवेभ्य इदंन
मः॥उछ्मो अग्ने यजमानायैधि निष्टुष्मो अ
भिदासते॥अग्ने देवेध्म मन्विध्म मंद्रजिह्वाम

या.मा. र्सस्यतेहोतर्मूर्धनाजिघर्मिरायस्पोषायसुमीर्ज्या
१२ स्त्वायसुवीर्याय॥समिध्यमग्निं॥देवाःपितरःपि
तरोदेवायोहमस्मिससन्यंजेयस्यास्मिसतमंत
रेमिस्वंमइष्टंस्वंदत्तंस्वंपूर्तंस्वंश्रांतंस्वं
हुतंतस्यमेग्निरुपद्रष्टावायुरुपश्रोतादित्योनुख्या
ताद्यौःपितापृथिवीमाताप्रजापतिर्बंधुर्यएवास्मि ५
ससन्यंजेयस्यास्मिनतमंतरेमि॥होतृप्रकरेज
पति॥प्रजापतयइदं०॥मनोसिप्राजापत्यंमनं १२

मा सौभूतेनाविश ॥ स्रुवाघारमनुमंत्रयते ॥ इंद्रायेदं०
वागस्यैंद्री सपत्नक्षयणी वाचामेंद्रियेणाविश ॥ स्रु
च्याघारमनुमंत्रयते ॥ देवाः पितरः ०मंतरैमिमां
देवेघाश्रावयायुषेवर्चसे ॥ समिध्यइदं० ॥ वसंत
मृतूनांप्रीणामिसमाप्रीतःप्रीणातु ॥ तनूनपातइ
दं० ॥ ग्रीष्ममृतूनांप्रीणामिसमाप्रीतःप्रीणातु ॥ इ
डभ्यइदं० ॥ वर्षाऋतूनांप्रीणामितामाप्रीताःप्रीणं
तु ॥ बर्हिषइदं० ॥ शरदमृतूनांप्रीणामिसामाप्री

२ ॐ अग्नये सोमायाग्नये इग्निभ्यां देव· ६ ७

या·मा· तां प्रीणातु ॥ अग्नये सोमायाग्नये प्रजापतयेऽग्नीषो
१५ माभ्यामिंद्रायवैमृधायदेवेभ्य आज्यपेभ्य इदं० ॥ हे
मंत शिशिरा ऋतूनां प्रीणामि तौ मा प्रीतौ प्रीणीतां ॥
अग्नय इदं० ॥ अग्निश्चक्षुष्मान् त्स्याहं देवयज्य
या चक्षुष्मान् भूयासं ॥ सोमायेदं० ॥ सोमश्चक्षुष्मान्
त्स्याहं देवयज्यया चक्षुष्मान् भूयासं ॥ पंचहोता
रं पुरस्तात्प्रविषामवदानानां व्याचक्षीत ॥ अग्नि
र्होता ॥ अश्विनाध्वर्यू ॥ त्वष्टाग्नीत् ॥ मित्र उपव १४

क्का॥अग्नयइदं०॥अग्नेरहंदेवयज्ययानादोभूया
सं॥प्रजापतयइदं०॥दाब्धेरस्यदब्धोभूयासंपा
प्मानंदभेयं॥अपउपस्पृश्य॥अग्नीषोमाभ्यामिदं०
अग्नीषोमयोरहंदेवयज्ययावृत्रहाभूयासं॥इं
द्रायवैमृधायेदं०॥इंद्रस्यवैमृधस्याहंदेवयज्य
यासपत्नोभूयासं॥इंद्राग्निभ्यामिदं०॥इंद्राग्नि
योरहंदेवयज्ययेंद्रियाव्यंनादोभूयासं॥अग्नये
स्विष्टकृतइदं०॥अग्नेःस्विष्टकृतोहंदेवयज्यया

सोमायाग्नयेप्रजापतयेग्नीषोमाभ्यामिंद्रायवैमृधायदेवेभ्यआज्यपेभ्योग्नये

पा॰ मा॰ युष्मान्यज्ञेन प्रतिष्ठांगमेयं॥ अग्निर्मादुरिष्टात्पातु
१५ सविताघशंसात्। योमेंतिदूरे रातीयति तमेतेन जेषं॥
पित्रे पितामहाय प्रपितामहायेदं०॥ सुरूपवर्षवर्ण
एहीमा भद्रा दुर्याः अभ्येहि मामनुव्रता न्वुशीर्षा
णि मृड्ढ्मिड एह्यदितएहि सरस्वत्येहि रंतिरसि
मतिरसि सूनर्यसि जुष्टेजुष्टेतेशी योपहूतउपहूवं
तेशीयुसामे सत्याशीरस्य यज्ञस्य भूयादरेडता० १५
व्यैतु॥ इडामाह्रियमाणां प्रतीक्षते॥ इडएह्यदि

तएहिभूयस्यैहिश्रेयस्यैहिवसीयस्यैहिचित्तएहिदधि
षएहि॥ उपमांभूपह्वेसमंदेवगवीर्जपति॥ विदसिम
नास्तिवस्वीरंतिरमतिःसूनरीसूनृता॥ उत्वेरुपह्वे
समनुष्यगवीर्जपति॥ विभ्रात्वंभूतानुप्राणिहिवि
भ्रात्माभूतानुप्राणंति॥ भूरस्यायुरसीषिरसि॥ सु
रूपवर्षवर्णएहीमाम्भुइंदुयीः॥ अभ्येहिमामनुव्र
तान्युइशीर्षाणिमृदुःसानःप्रियासुमतूर्तिःप्रियां
नःसुहन्नंनप्रियपवतीमघोनीजुष्टएहिरंतघुहिह

सा·मा· मत एहि स्तनत एहि सुह वाम एहि सह रायस्पोषे
१५ णदेवीर्दैवैरभीमा निवर्तध्वं स्योना स्योनेन घृते
न मा समुक्षत नम एतदुपदंभिषगृषिर्ब्रह्मायद्द्रो
समुद्रउडुचं नेवस्रुचावागयेविमस्यति ष्ठतिभृं
गेर्भिर्दशभिर्दशान ।। उच्चै रूपह्वे ।। वायुर्विडीतेमु
ता ।। होतारमीक्षमाणो वायुं मनसा ध्यायेत् ।। उप
हूतो यं यजमान इत्युच्यमाने ।। उपहूतः पशुमा १५
नस्मानि ।। जपति ।। अस्मास्विंद्र इंद्रियं दधातु

स्मान्त्वायंऽउतयज्ञाः संचंतामुस्मासुसंत्वाशिषः सा
नः प्रियासुप्रतूर्तिर्मघोनीजुष्टिरसिजुषस्वनोजु
ष्टानोसिजुष्टिंतेगमेयं ॥ इडापाअह देवयज्य
यापुष्टिमान्पशुमाभूयासमिडेभागंजुषस्वनो
जिन्वगाजिन्वार्वतस्तस्यास्तेभक्षिवाणः स्याम
सर्वात्मानः सर्वगणाः ॥ इडाधेनुः सहवत्सान
आगादूर्जंदुहानापयसाप्रपीना ॥ सानोअन्ने
नहविषोतगोभिरिडाजिन्वतांपयसाभ्यस्मान् ॥

या·मा· उपहूतामिडां॥ इडास्थिस्योनास्तिस्योनहृत्सानो
१८ रायस्पोषे सुप्रजास्त्वे धाः॥ सुरवस्यत्वा द्युम्नाय
सुरभ्यास्यत्वाय त्वा प्राश्नामि॥ उपहूतो मृत्विजः
प्राश्नंति॥ यजमानः पंचमो वान्यता भवं त्सा मा
र्जनात्॥ मनोज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं
समिमं दधातु॥ बृहस्पतिस्तनुतामिमं नो विश्वे
देवाइह मादयंतां॥ अंतर्वेदि पवित्रवति प्रस्तर १८
देशे मार्जयंते॥ अभ्रपिन्वस्वदद्दतो मे मा क्षायि

कुर्वतोमेमोपदसद्दिशांक्लृप्तिरसिदिशोमेकल्पं
तांकल्पन्तांमेदिशोदैवीश्चमानुषीश्चाहोरात्रेमे
कल्पेतामर्धमासामेकल्पन्तांमासामेकल्पन्तामृ
तवोमेकल्पन्ताꣳसंवत्सरोमेकल्पतांक्लृप्तिरसि
कल्पन्तांमआशानांत्वाशापालेभ्यश्चतुर्भ्यो॑अ
मृतेभ्यइदंभूतस्याध्यक्षेभ्योविधेमहविषाव
यꣳऋजेतांभागीभागंमाभागोभंक्तनिर्भागंभजा
मोपास्पृन्वोषधीर्जिन्वद्विपात्साहिचतुष्पादव

य॰मा॰ दिवो वृष्टिमेरय ब्राह्मणानामिदꣳ हविः सोम्यानाꣳ
१८ सोमपीथिनां निर्भक्तो ब्राह्मणो नेहाब्राह्मणस्यास्ति
॥ प्रति दिशं व्यूहति ॥ इदं ब्रह्मणः ॥ इदꣳ होतुः ॥ इ
दमध्वर्योः ॥ इदमग्नीधः ॥ चतुर्धा व्यादिशति ॥ इ
यꣳ स्थाल्यमृतस्य पूर्णा सहस्रधार उत्सो अक्षीय
माणः ॥ स दाधार पृथिवीमन्तरिक्षं दिवं च तेनौदने
नातितराणि मृत्युं ॥ प्रजापतेर्भागोस्यूर्जस्वान्पय
स्वान्प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदान १८
व्यानौ मे पाह्यक्षितोस्यक्षित्यै त्वा मा मे क्षेष्ठा अमु

त्रामुष्मिन्लोके॥ अंतर्वेद्यन्वाहार्यमासन्नमभिमृ
शति॥ दक्षिणसद्य उपहर्तवै॥ इत्युच्यमाने दक्षिण
तएतब्राह्मणा अयंच॥ ओदनो यथाभागं प्रतिगृह्णी
ध्वं॥ संप्रेष्यति॥ दक्षिणां प्रतिग्रहीष्यन्त्सदस्याक्र
त्तौपान्यात्॥ व्यावृत्य प्रतिग्रहणं॥ देवस्य त्वा सवि
तुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णा
मि राजा त्वा वरुणो नयतु देवि दक्षिणे ब्रह्मण ओद
नं तेनामृतत्वमश्यां वयो दात्रे मयो मह्यमस्तु प्रति मया
ग्रहीत्रे क इदं कस्मा अदात्कामः कामायकामो दा

या.मा. ताकामः प्रतिग्रहीता कामं समुद्रमाविश कामेन
१८ त्वा प्रतिगृह्णामि कामैतत्त एषा ते काम दक्षिणो
ता न स्त्वांगीरसः प्रतिगृह्णातु ॥ अन्वाहार्य चतु
र्थीकरण क्रमेण प्रतिगृह्य प्रत्यायंति ब्रह्मापि
स्वमार्गेण गत्वा प्रतिगृह्यागत्योपविशेत् ॥ अग्न
यइदं० ॥ एषा ते अग्ने समित्तया वर्धस्व चाचप्या
यस्व ॥ वर्धिषीमहि च वयमा च प्यासिषीमहि ॥ १८
यं ते अग्न आ रम्भामहे वाक्षिपितश्चरन् ॥ प्र

जां च तस्य मूलं च नीचैर्देवा निवृश्चत ॥ अग्ने यो नो
भिदासति समानो यश्च निष्ट्यः ॥ इध्मस्येव प्रक्षा
यतो मा तस्योच्छेषि किंचन ॥ यो मां द्वेष्टि जातवेदो
यं चाहं द्वेष्मि यश्च मां ॥ सर्वांस्तानग्ने संदह यां
श्चाहं द्वेष्मि ये च मां ॥ अनूयाजसमिध माधीयमा
नां ॥ भूतानामाधिपतये रुद्राय तंतिचरायेदं० ॥

अप उपस्पृश्य ॥ वेदिर्बर्हिः शृतं हविरिध्मः परि
धयः स्रुचः ॥ आज्यं यज्ञ ऋचो यजुर्याज्यांश्च

या.मा. षट्कारा: स्तमेसन्नेतयोनमंतामि ध्मसन्नहने
२० ऊते॥ इध्मसन्नहनेऊतेजपति॥ अंगिरसोमास्य
यज्ञस्यप्रातरनुवाकेरहोषुः॥ अनूयाजेषुजपति॥
महाहविर्होता॥ सत्यहविरध्वर्युः॥ अच्युतपाजा
अग्नीत्॥ अच्युतमनाउपवक्ता॥ अनाधृष्यश्चा
प्रतिधृष्यश्चयज्ञस्याभिगिरो॥ अयास्यउद्गा
ता॥ सप्तहोतारंपुरस्तादनूयाजानांव्याचक्षीत॥
अग्नयइदं०॥ बर्हिषोहंदेवयज्ययाप्रजावान्भू २१

यासं॥अग्नयइदं०॥नराशंसस्याहंदेवयज्य
यापशुमान्भूयासं॥अग्नयइदं०॥अग्नेःस्विष्ट
कृतोहंदेवयज्ययायुष्मान्यज्ञेनप्रतिष्ठांगमेयं॥व
सुभ्यइदं०॥वसुंदेवान्यज्ञेनापिप्रेयं॥रुद्रेभ्यइदं०॥
अपउपस्पृश्य॥रुद्रांदेवान्यज्ञेनापिप्रेयं॥अपउ०
आदित्येभ्यइदं०॥आदित्यांदेवान्यज्ञेनापिप्रेयं॥
परिधीनज्यमानान्॥समक्तांबर्हिर्हविषाघृते
नसमादित्यैर्वसुभिःसंमरुद्भिः॥समिंद्रेणविश्वे

पा॰मा॰ भिर्द्दैवेभिरंक्तांदिमंनभोगछतुपत्न्याहो॥ प्रस्तरम
२१ ज्यमानमनुमंत्रयते॥ अपिप्रेऽद्यज्ञोयज्ञमथाइदे
वांऽअरंकृतः सोमः॥ तंमित्रोवरुणोअर्यमारायस्पोषाय
स्पोषायजमानंविशंतु॥ प्रस्तरस्यतृणमपात्तम
नुमंत्रयते॥ अग्नयइदं०॥ अग्नेरहमुज्जितिम
नूज्जेषं॥ सोमायेदं०॥ सोमस्याहमुज्जितिमनू
ज्जेषं॥ अग्नयइदं०॥ अग्नेरहमुज्जितिमनूज्जे २१
षं॥ प्रजापतयइदं०॥ प्रजापतेरहमुज्जितिमनू

ज्जेषं॥अग्नीषोमाभ्यामिदं०॥अग्नीषोमयोर
हमुज्जितिमनूज्जेषं॥इंद्रायवैमृधायेदं०॥इंद्र
स्यवैमृधस्याहमुज्जितिमनूज्जेषं॥इंद्राग्निभ्या
मिदं०॥इंद्राग्नियोरहमुज्जितिमनूज्जेषं॥देवेभ्य
आज्यपेभ्यइदं०॥देवानामाज्यपानामहमुज्जि
तिमनूज्जेषं॥अग्नयेस्विष्टकृतइदं०॥अग्नेःस्वि
ष्टकृतोहमुज्जितिमनूज्जेषं॥यैर्हिहोतायजमा य
नस्यनामगृह्णीयात्तर्हिब्रूयात्॥एमाअग्मंना

या॰मा॰ ऽशिषो दोहकामा इंद्रवंतो वनामहे धुक्षीमहि प्रजा
२२ मिषं ॥ सा मे सत्याशीर्देवेषु भूयान्स्मन्यान्स्मन्यतमा
जुष्टाज्जुष्टतमा रेउ तामनसा तच्छकेयं यज्ञो दिवं
रोहतु यज्ञो दिवं गच्छतु यो देवयानः पंथास्तेन य
ज्ञो देवाँ अप्येतु ॥ आशिष्बुपजपति ॥ यज्ञो म आ
गम्यात् ॥ यत्कामयते तस्य नाम गृह्णाति ॥ रो
हितेन त्वाग्निर्देवतां गमयतु हरिभ्यां त्वेंद्रो देव
तां गमयत्वेतशेन त्वा सूर्यो देवतां गमयतु ॥ प्र २३

स्तरमवस्तृष्टमनुमंत्रयते॥ननूभ्यइदं०॥द्विवःस्वी
लोवेततः पृथिव्याअध्युत्थितः॥तेनासहस्रकां
डेनद्विषंतंतापयामसिद्विषंनःस्तापयतोबहुमा
नागास्तप्योषधयः॥प्रस्तरस्यतृणमनुप्रहृत
मनुमंत्रयते॥विष्णोःशंयोरहंदेवयज्ययायज्ञे
नेप्रतिष्ठांगमेयं॥शंयुवाकेजपति॥वितेमुंचा
मिरशनाविरश्मीन्वियोक्त्रायानिपरिचर्तना
निधत्तादस्मासुद्रविणंयच्चभद्रंप्रणोब्रूताद्भा

या॰मा॰ गृधांदेवतासु॥ विश्वेंभ्यः अग्निंपरिधांश्च प्रक्रियमा
२३ णेष्वजपति॥ वसुभ्योरुद्रेभ्य आदित्येभ्यः संस्त्राव
भागेभ्यइदं०॥ इष्टोयज्ञो भृगुभिराशीर्दावसुभिः। तस्य
भिराशीर्दावसुभिराशीर्वाः अथर्वभिः॥ तस्य
मेष्टस्यवीतस्यद्रविणमागम्यादृसुर्यज्ञोवसु
मान्‌यज्ञस्तस्यमायज्ञस्यवसोर्वसुमतोवास्वि
हागच्छतुयज्ञोमआगच्छतु॥ संस्त्रावभागान २३
नुमंत्रयते॥ यत्कामयतेतस्यनामगृह्णामि॥

वेदोसि वित्तिरसि पाप्मनो व्यावृत्तिं ॥ अपउपस्पृश्य ॥
विदेयक र्मासि करुणमसि क्रियासंस निरसिस
निता सि सुनेयं घृतवंतं कुलायिनं रायस्पोषं स
हस्त्रिणं वेदो ददातु वा जिनं ॥ वेदमंतर्वेद्यासनम
भिमृशतु ॥ सोमायेदं० ॥ सोमस्याहं देवयज्यया
सुरेतारेतो धिषीय ॥ त्वष्ट्र इदं० ॥ त्वष्टुरहं देवय
ज्यया पशूनां रूपं पुषेयं ॥ देवानां पत्नीभ्य इदं० ॥
देवानां पत्नीनामहं देवयज्यया प्रजनिषीय प्रज

या·मा· याचपशुभिश्च॥राकायाइदं॰॥राकायाअहंदेवयज्य
२५ याप्रजावान्भूयासं॥सिनीवाल्याइदं॰॥सिनीवाल्या
अहंदेवयज्ययापशुमान्भूयासं॥कुह्वाइदं॰॥कुह्वा
अहंदेवयज्ययापुष्टिमान्भूयासं॥अग्नयेगृहपत
यइदं॰॥अग्निर्गृहपतिर्यज्ञस्यप्रतिष्ठातस्याहंदे
वयज्ययाप्रतिष्ठावान्भूयासं॥दिविज्योतिषेअज
रायपरमात्मनइदं॰॥इडास्माननुवस्तान्घृतेनय
स्याःपदेपुनतेदेवयंतः॥वैश्वानरीशक्करीवावृधाने २५

पयज्ञमस्थितवैश्वदेवी॥आज्यैडामनुमंत्रयते॥उ
पहूतःपश्चुमानसानि॥जपति॥अयासरस्वतीय
ज्ञोभगीनातस्यैतेस्वाहा॥फलीकरणहूयमानेमु
खंविमृष्टे॥अग्नयेदब्ध्यायवेअन्नीततनवइदं०॥
यासरस्वतीवेशभगीनातस्यैतेस्वाहा॥हुतमुखं
विमृष्टे॥विश्वेभ्योदेवेभ्यइदं०॥वेदोसिवित्तिरसि
विदेयकर्मासिकरुणमसिक्रियासिसनिरसिस
नितासिसनेर्यो॥वेदंहोत्रापत्न्यैप्रदीयमानं॥घृ

या॰मा॰ तवंतंकुलायिनंरायस्पो॰ं सहस्त्रिणंवेदोदद
२५ तुवाजिनं॥उपस्तृ॰स्यमा॰ं॥निर्द्विषंतंनिरराति
नुद॥वेदंपत्नीनिरस्यते॥त्वयावेदिंविविदुःपृथि
वींत्वयायज्ञोजायतेविश्वदानिः॥अछिद्रंयज्ञं
न्वेषिविद्वांस्त्वयाहोतासंतनोत्यर्धमासान्॥वेदं
स्तीर्यमाणं॥यथेतमध्वर्युरेत्य॥अयासरस्वत्येय
ज्ञोभगीनायाइदं॰॥सरस्वत्यैवेशभगीनायाइदं॰॥
इंद्रायसुमनसइदं॰॥पूर्णमासायेदं॰॥अमावास्या २५

याइदं०॥ नारिष्ठाभ्यामिदं०॥ नारिष्ठाभ्यामिदं०॥ ना
रिष्ठाभ्यामिंइ वायुभ्यामिदं०॥ नारिष्ठेभ्योदेवसोम
मरुद्‌भ्यइदं०॥ ब्रह्मणइदं०॥ नारिष्ठायपरमात्मन
इदं०॥ इष्टेभ्यइदं०॥ वषडनिष्टेभ्यइदं०॥ भेषजंदु
रिष्टाइदं०॥ निष्कृत्याइदं०॥ निर्ऋत्याइदं०॥ अपउ०
दोरध्याइदं०॥ देवीभ्यस्तनूभ्यइदं०॥ ऋध्याइदं०॥
समृध्याइदं०॥ अयसेग्नयइदं०॥ वरुणायेदं०॥
॥अग्नीवरुणाभ्यामिदं०॥ अग्नीवरुणाभ्यामिदं०

या॰मा॰ अग्नयेसे्ग्नयइदं॰॥ प्रजापतयइदं॰॥ अग्नयइदं॰वा
२५ यवइदं॰॥ सूर्यायेदं॰॥ प्रजापतयइदं॰॥ यज्ञायेदं॰
अग्नयइदं॰ देवेभ्यइदं॰ देवेभ्यइदं॰ देवेभ्यइदं॰ ब्र
ह्मणइदं॰ ऋभुभ्यइदं॰ सूर्यायेदं॰ सूर्यायेदं॰ सूर्या
येदं॰ मरुद्भ्यइदं॰ इंद्रायमघवतइदं॰ इंद्रायवृत्र
घ्नइदं॰॥ इंद्रायहरिवतइदं॰ वरुणायेदं॰ वरुणा
येदं॰ देवेभ्यइदं॰ अग्नयइदं॰ देवेभ्योगातुविद्भ्यो
यज्ञायपरमात्मनइदं॰॥ अग्नेदक्षायोज्ञीत २५

तनोपाहि माद्यदिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै
पाहि दुरद्मन्यै पाहि दुश्चरितादविषन्नः पितुं कृ
णु सुषदा योनिꣳ स्वाहा ॥ समिष्टयजुरनुमंत्रय
ते ॥ दिवः खीलोवततः पृथिव्या अध्युत्थितः ॥
तेनासहस्रकांडेन द्विषंतꣳ शोचयामसि द्विषन्मे
बहु शोचत्वोषधे मो अहꣳ शुचं ॥ बर्हिरनुप्रहृत
मनुमंत्रयते ॥ संयज्ञपतिराशिषा ॥ यजमानभा
गंप्राश्नाति ॥ इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ

या॰मा॰ सर्वगणः स्वस्तये। आत्मसनि प्रजासनि पशुसन्य
२८ भयसनि लोकसनिर्वृष्टिसनि॥ अग्निः प्रजां बहु
लांकरोत्वन्नं पयो रेतो अस्मासु धत्त रायस्पोषमि
षमूर्जमस्मासु दीधरत्स्वाहा॥ श्रृतभागं प्राश्नाति
श्रृतस्य॥ दधिक्राव्णो अ॰ रिषत्॥ दध्नः॥ सर्वमसि
सर्वं मे भूयाः सर्वमसि सर्वं मे भूयाः पूर्णमसि पूर्णं
मे भूया अक्षितमसि मा मे क्षेष्ठाः॥ आनीयमाना २८
नुजपति॥ प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तां॥

दक्षिणायां दिशि मासाः पितरो मार्जयंतां॥ प्रतीच्यां दि
शि गृहाः पशवो मार्जयंतां॥ उदीच्यां दिश्याप ओषध
यो वनस्पतयो मार्जयंतां॥ ऊर्ध्वायां दिशि यज्ञः संव
त्सरो यज्ञपतिर्मार्जयंतां॥ प्रति दिशं व्युत्सिंचति॥ स
मुद्रं वः प्रहिणोम्यक्षिता स्वां योनिमपिगच्छत॥ अछि
द्रः प्रजया भूयासं मा परासेचि मत्पयः॥ शेषं निन
यति॥ यदस्य ते सरस्वति गोष्वश्वेषु यन्मधु॥ तेन
मे वाजिनीवति मुखमंग्धि सरस्वति॥ मुखं विमृ

ष्टे॥अतएवोपोत्थाय॥विष्णोःक्रमोस्यभिमातिहागायत्रे
णछंदसापृथिवीमनुविक्रमेनिर्भक्तःसयंद्विष्मः॥विष्णोः
क्रमोस्यभिशस्तिहात्रैष्टुभेनछंदसांतरिक्षं॰विष्णोः
क्रमोस्यरातीयतोहंताजागतेनछंदसादिवमनुवि
क्रमे॰विष्णोःक्रमोसिशत्रूयतोहंतानुष्टुभेनछंदसा
दिशोनुविक्रमे॰चतुरोविष्णुक्रमान्क्रामति॥दक्षि
णेनप्रक्रम्यसव्येनानुप्रक्रामतीतिश्चतुर्थंजप
ति॥उद्यंनद्यमित्रमहःसपत्नान्मेअनीनशः॥दि २८

वैनान्विद्युतांजहि निम्रोचुं न धरान्च्रधि ॥ उद्यंनद्य
विनोभज पिता पुत्रेभ्यो यथा ॥ दीर्घायुत्वस्य हे शिषे
तस्य नो देहि सूर्य ॥ उद्यन्नद्य मित्रमह आरोहंनुत्त
रां दिवं ॥ हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥ शुके
षु मे हरिमाणं रोपणाकासु दध्मसि ॥ अथो हारिद्र
वेषु मे हरिमाणं निदध्मसि ॥ उदगादयमादित्यो वि
श्वेन सहसा सह ॥ द्विषंतं मम रंधयन्मो अहं द्विषते
रधं ॥ यो नः शपादशपतो यश्चनः शपतः शपात् ॥

या·मा· उपाश्रुतस्मै निम्रुक्तु सर्वं पापं समूहतां॥ यो नः
२९ सपत्नो यो रणो मर्तो भिदासति देवाः॥ इध्मस्येव प्र
क्षायतो मा तस्योच्छेषि किंचन॥ अग्ने सुवः सुवर
गन्म संदृशस्ते माच्छित्सि यत्ते तपस्तस्मै ते मावृक्षि
सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहि
वर्चोधा असि वर्चो मयि धेहि॥ आदित्यमुपतिष्ठते॥
इदमहं पाप्मानं भ्रातृव्यमाभ्यो दिग्भ्यो स्यै दिवो स्मा २९
दन्तरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजा

मिनिर्भक्तः सयंद्विष्मः ॥ अपउ० ॥ यंद्वेष्टितस्यवर्ध
मनसाध्यायति ॥ सज्योतिषाभुवं ॥ ऐंद्रीमावृतमन्वा
वर्ते ॥ पुण्याभवंतुयालक्ष्मीः पराभवंतुयाः पापीः ॥
दक्षिणमंसमभिपर्यावर्तते ॥ तेजोसि ॥ आहवनी
यमुपपर्यावर्तते ॥ समहंप्रजयासंमयाप्रजासमहं
रायस्पोषेणसंमयारायस्पो~~षेण~~संमस्यारायस्पो
षः ॥ उपतिष्ठते ॥ समिधोअग्नेमेदीदिहिसमे
धातेअग्नेदीद्यासं ॥ उपसमिंधे ॥ वसुमान्यज्ञो

या॰मा॰ वसीयान्भूयासं॥उपतिष्ठते॥अग्नेवर्क्षेस्वदितुं
३० नस्तनयेपितुंपच॥विमुंःशंतोकायतनुवेस्योनः॥
दक्षिणाग्निमुपतिष्ठते॥अग्नुआयूंषिपवस
आसुवोर्जमिषंचनः॥आरेबांधस्वदुछुनां॥
अग्नेपवस्वसुस्वपाअस्मेवर्चःसुवीर्य॥दधसोषंः
रयिंमयि॥अग्नेगृहपतेसुगृहपतिरहंत्वयागृह
पतिनाभूयासंःसुगृहपतिर्मयात्वंगृहपतिना ३०
भूयाःशतःहिमास्तामाशिषमाशासे॥ ॥

अमुकशर्मणेमुकशर्मणे॥ ज्योतिष्मतीं ज्योतिषेतं
तवेत्वा॥ अमुकशर्मन्नमुकशर्मन्ननुमाज्योतिषा
मनु॥ अंतराग्नी निषीदति॥ वेदतृणान्युपस्थआ
धाय॥ येदेवायज्ञहनः पृथिव्यामध्यासते॥ अ
ग्निर्माते भ्योरक्षतुगच्छेम सुकृतोवयं॥ येदेवाय
ज्ञमुषः पृथि० सते॥ अग्निर्माते भ्यो० वयं॥ आग
न्म मित्रावरुणावरेण्यारात्रीणांभागोयुवयोर्या
अस्ति॥ नाकंगृह्णानाः सुकृतस्यलोकेतृतीये

या॰मा॰ पृष्ठे अधि रोचने दिवः ॥ ये देवा यज्ञहनोऽन्तरिक्षे ध्या
३१ सते ॥ वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं ॥ ये दे
वा यज्ञमुषोऽन्तरिक्षे ध्यासते ॥ वायुर्मा तेभ्यो रक्ष॰
वयं ॥ यास्ते रात्रीः सवितर्देवयानीरन्तरा द्यावापृ
थिवी वियन्ति ॥ गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहा
णा स्तरता रजांसि ॥ ये देवा यज्ञहनो दिव्यध्यासे
ते ॥ सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं ॥ ये
देवा यज्ञमुषो दिव्यध्यासते ॥ सूर्यो मा॰ वयं ॥ ये ३१

नेंद्रांयसमभेरः पयांऽस्पुत्तमेनहविषाजातवेदः॥
तेनाग्नेत्वमुतवर्धयेमंऽसजातानांऽश्रैष्ठ्यआधे
ह्येनं॥अंतर्वेद्यासीनोतिमोक्षांजपति॥स्वआयत
नेगत्वा॥कस्त्वायुनक्तिसत्वाविमुंचति॥सर्वम
नुवीक्षते॥अग्नेव्रतपतेव्रतमचारिषंतदशकं
तन्मेराधि॥वायोव्रतपते॰रिषं॥तदशकं॰राधि॥
आदित्यव्र॰रिषं॥तदशकं॰राधि॥व्रतानांव्रत॰
चारिषं॥तदशकं॰राधि॥व्रतंविसृजते॥यज्ञोवै

या-मा· भूवसआवभूवुसमजंज्ञेसवीवृधे॥ तद्देवानुम
२२ धिपतिर्वभूवुसेअस्मान् अधिपतीन्करोतुवयंस्या
मपतयोरयीणां॥ यज्ञस्यपुनरालंभंजपति॥ गोमां
अग्नेविमान् अश्वीयुक्तोनृवत्सरवासदमिदप्रमृ
ष्यः॥ इडावान् एषोअसुरप्रजावान्दीर्घोरयिः पृथु
बुध्नः सभावान्॥ प्रादुर्देत्य गोमतीजपति॥
यज्ञशंचतेयज्ञनमोनमश्चतेयज्ञशिवे ३२
नमेसंतिष्ठस्योनेनमेराजयज्ञमहाय

संतिष्ठस्वसुभूतेनेमसंतिष्ठस्वब्रह्मवर्चसेनेमसं
तिष्ठस्वयज्ञस्यर्धिमनुसंतिष्ठस्वोपतेयज्ञनमउ
पतेनमउपतेनमः॥ जपति॥ वृष्टिरसिरश्वमेपा
प्मानमृतात्सत्यमुपागामुक्तश्रुत्या॥ अपउपस्
इय॥ यथेतंप्रतिनिष्क्रामति॥ ब्राह्मणांस्तर्पयि
तवै॥ अग्नेनयसुपथा॰ नमउक्तिं विधेम॥ प्रमादं
कुर्वतांकर्मप्रच्यवेताध्वरेषुयत्॥ स्मरणादेवत
द्विष्णोः संपूर्णंस्यादितिश्रुतिः॥ याजमानंसमाप्तं॥

या·मा· र्थं व्रतलोपप्रायश्चित्तार्थं व्रतपतीष्टिस्थाने पू
३३ र्णाहुतिं होष्यामि॥ अग्नये व्रतपतय इदं०॥ क
पालानां प्रमाणयथोक्तमानोकरणजनितप्रत्य
वायपरिहारार्थं तिस्रो व्याहृतीर्होष्यामि॥ अग्न
य इदं० वायव इदं० सूर्यायेदं० प्रधनवैकल्यज
नितप्रत्यवायपरिहारार्थं सर्वप्रायश्चित्तं करि
ष्ये॥ प्रजापतय इदं० सांगतासिध्यर्थं सर्वप्राय
श्चित्तं करिष्ये॥ पिंडपितृयज्ञलोपजनितप्रत्य

वायुपरिहारार्थं समहोतारं सग्रहं होष्यामि॥ मुहा
हेविहो॰ सप्तहोत्रे वाचस्पतये ब्रह्मण इदं॰ अस्मि
न्यागमध्ये केशकीटपतंगपिपीलिकाद्युपघात
दोषपरिहारार्थं द्वे मिंदाहुती होष्यामि॥ मिंदव
तेग्नय इदं॰ अस्मिन्यागमध्ये मंत्रतंत्रकर्मविप
र्यासादि प्रायश्चित्तार्थं त्वंनः सत्वंन इत्याज्या
हुती होष्यामि॥ अग्नीवरुणाभ्यामिदं॰ अस्मि
न्यागमध्ये स्वराक्षरपदवर्णभ्रेषन्यूनातिरि

प्रा॰ क्तदोषपरिहारार्थं आभिगर्भिरित्याज्याहुतिं हो
३५ ष्यामि॥ इंद्राय हरिवत इदं॰ यागमध्ये स्वाहाका
रवषट्कारपूर्वापरआहुतिप्रक्षेपजनितप्रत्य
वायपरिहारार्थं मनस्वत्याज्याहुतिं होष्यामि।
मनसे ज्योतिष इदं॰॥ अस्मिन्यागमध्ये न्यूना
तिरिक्तजनितप्रत्यवायपरिहारार्थं अतिरि
क्तमित्येकामाज्याहुतिं होष्यामि॥ देवेभ्य इदं॰ ३५
अस्मिन्यागमध्ये यजमानऋत्विक्पात्राणां

मध्येअंतरागमनजनितप्रत्यवायपरिहारार्थं
इदंविष्णुरित्येकामाज्याहुतिंहोष्यामि॥विष्णु
वइदं॰वेदिबर्हिषासम्यक्अनतिस्तरणज
नितप्रत्यवायपरिहारार्थंसर्वप्रायश्चित्तंकरि
ष्ये॥सांगतासिध्यर्थंसर्वप्रायश्चित्तंकरिष्ये॥

इतिहिरण्यकेशीदर्शपूर्णमासयाजमानसमाप्तम्॥